# Vrindavanashtakam 2

# વૃન્દાવનાષ્ટકમ્ ૨

## Document Information

Text title : vRRindAvanAShTakam 2

File name : vRRindAvanAShTakam.itx

Category : vishhnu, aShTaka, tulasI, devii, devI

Location : doc_vishhnu

Author : Visvanatha Chakravarti Thakura

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji, also from Stamrita Lahari

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

# વૃન્દાવનાષ્ટકમ્ ૨

ન યોગસિદ્ધિર્ન ચ માઽસ્તુ મોક્ષો વૈકુણ્ઠલોકેઽપિ ન પાર્ષદત્વમ્ ।
પ્રેમાપિ ન સ્યાદિતિ ચેત્તરાં તુ મમાસ્તુ વૃન્દાવન એવ વાસઃ ॥ ૧॥

તાર્ણં જનુર્યત્ર વિધિર્યયાચે સદ્ભક્તચૂડામણિરુદ્ધવોઽપિ ।
વીક્ષ્યૈવ માધુર્યધુરાં તદસ્મિન્ મમાસ્તુ વૃન્દાવન એવ વાસઃ ॥ ૨॥

કિં તે કૃતં હન્ત તપઃ ક્ષિતીતિ ગોપ્યોઽપિ ભૂમેઃ સ્તુવતે સ્મ કીર્તિમ્ ।
યેનૈવ કૃષ્ણાઙ્ઘ્રિપદાઙ્કિતેઽસ્મિન્ મમાસ્તુ વૃન્દાવન એવ વાસઃ ॥ ૩॥

ગોપાઙ્ગનાલમ્પટતૈવ યત્ર યસ્યાં રસઃ પૂર્ણતમત્વમાપ ।
યતો રસો વૈ સ ઇતિ શ્રુતિસ્તન્મમાસ્તુ વૃન્દાવન એવ વાસઃ ॥ ૪॥

ભાણ્ડીરગોવર્ધનરાસપીઠૈસ્ત્રિસીમકે યોજનપઞ્ચકેન ।
મિતે વિભુત્વાદમિતેઽપિ ચાસ્મિન્ મમાસ્તુ વૃન્દાવન એવ વાસઃ ॥ ૫॥

યત્રાધિપત્યં વૃષભાનુપુત્ર્યા યેનોદયેત્પ્રેમસુખં જનાનામ્ ।
યસ્મિન્મમાશા બલવત્યતોઽસ્મિન્ મમાસ્તુ વૃન્દાવન એવ વાસઃ ॥ ૬॥

યસ્મિન્મહારાસવિલાસલીલા ન પ્રાપ યાં શ્રીરપિ સા તપોભિઃ ।
તત્રોલ્લસન્મઞ્જુનિકુઞ્જપુઞ્જો મમાસ્તુ વૃન્દાવન એવ વાસઃ ॥ ૭॥

સદા રુરુન્યઙ્કુમુખા વિશઙ્કું ખેલન્તિ કૂજન્તિ પિકાલિકીરાઃ ।
શિખણ્ડિનો યત્ર નટન્તિ તસ્મિન્ મમાસ્તુ વૃન્દાવન એવ વાસઃ ॥ ૮॥

વૃન્દાવનસ્યાષ્ટકમેતદુચ્ચૈઃ પઠન્તિ યે નિશ્ચલબુદ્ધયસ્તે ।
વૃન્દાવનેશાઙ્ઘ્રિસરોજસેવાં સાક્ષાલ્લભન્તે જનુષોઽન્ત એવ ॥ ૯॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તિવિરચિતં વૃન્દાવનાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Vrindavanashtakam 2*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*